नैकवस्त्रस्तु भुञ्जीत न च यानस्थितोऽपि वा ।
न पादुकानुगतो वा न हसन् विलपन्न हि ॥
भुक्त्वैवं सुखमास्थाय तदन्नं परिणामयेत् ॥”
इति कूर्म्मे उपविभागे १८ अध्यायः ॥ * ॥

अपरञ्च ।

“दत्त्वा च हुत्वा पितृदेवताभ्यो
भृत्वातिथीन् भृत्यजनावशिष्टम् ।
तुष्टः शुचिः श्रद्दधानोऽत्ति योऽन्नं
तस्यामृतं स्यात् स पुमान् सुनक्ति ॥
सायं प्रातर्म्मनुष्याणामशनं देवनिर्म्मितम् ।
वैदिके लौकिकेऽग्नौ तु प्रत्यक्षे जाठरे तथा ॥
उपलिप्ते समे देशे शुचिः श्रद्धासमन्वितः ।
पात्रेष्ववर्णानुरूपेषु पुत्रशिष्यादिभिर्वृतः ॥
सुसंस्कृतं हितं स्निग्धं भुञ्जीतान्नमकुत्सयन् ।
यवगोधूमशाल्याद्यं मांसशाकादिभिर्युतम् ॥
कट्वम्ललवणैस्तिक्तैर्व्यञ्जनैस्तु सुगन्धिभिः ।
भक्ष्यप्रकारान् विविधान् कन्दमूलफलानि च ॥
पात्रं भूमौ प्रतिष्ठाप्य यो भुङ्क्ते वाग्यतः शुचिः ।
भोजने भोजने चैव त्रिरात्रफलमश्नुते ॥
यत्नेन धारयेद्विप्रः पवित्रं दक्षिणे करे ।
भुञ्जानस्तु विशेषेण अन्नदोषैर्न लिप्यते ॥
यातुधानाः पिशाचाश्च असुरा राक्षसास्तथा ।
घ्नन्ति केवलमन्नस्य मण्डलस्य विवर्ज्जनात् ॥
आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहः ।
मण्डलान्युपजीवन्ति तस्मात् कुर्व्वीत मण्डलम् ॥
चतुष्कोणं द्विजाग्र्यस्य त्रिकोणं क्षत्त्रियस्य तु ।
द्विकोणाकृति वैश्यस्य शूद्रस्य वर्त्तुलं सदा ॥
न लौहे न्मयसये पात्रे भिन्नेऽश्नीयात् कटेऽम्बरे ।
आपः पुनन्त्वितिमन्त्रेण भुवास्तीर्थं समासनम् ॥”
भुवा द्यौरित्युपविश्य पात्रं प्रक्षाल्य मूर्द्धानं दिवोऽरतिमितिपात्रमभिमन्त्र्य भूम्यास्त्वायनेति भूमौ पात्रं प्रतिष्ठापयेत् । आहतवासाः शुक्लवासा वा पवित्रात्मा क्षान्तात्मा प्राङ्मुख आसीनः पाणी प्रक्षाल्य दशहोतारमित्यदोति ध्यायेदव्यक्तं पुरुषम् । तत ओजोऽसीत्यन्नादमाहिंयमाणं प्रतिपत्तयेत् । ओजोसीत्यादिना प्रतिगृह्य अहमस्याग्निरन्नौत्यृग्भ्यामभिमन्त्रयेत् । उद्बुध्यस्वेति जाठराग्निमन्तरस्थं प्रबोधयेत् । भूतपतये नमः भुवनपतये नमः भूतानां पतये नमः इति नमस्कारान्ते बलित्रयं भूमौ दद्यात् । अथात्रैवात्मानं चिन्तयेत् ।

“प्राणस्य हृदयं स्थानमपानस्य गुदं स्मृतम् ।
समानो नाभिदेशे तु उदानः कण्ठमाश्रितः ॥
पञ्चमः स तु विज्ञेयो व्यानः सर्व्वाङ्गसन्धिषु ।
राजीवसदृशः प्राणो हृदये नित्यसंस्थितः ॥
तस्याधस्तादपानस्तु स वै गोक्षीरसन्निभः ।
नाभ्या मध्ये समानस्तु विद्युज्ज्वालासमप्रभः ॥
प्राणस्योपर्य्युदानस्तु इन्द्रनीलसमप्रभः ।
उभाभ्यामथ शाखाभ्यामथवाप्येकशाखया ।
अशून्यं पात्रं कुर्व्वीत एवं हानिर्न जायते ॥
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुख ! ।
त्वं यज्ञस्त्वं वषट्कारस्त्वं विष्णोः परमं पदम् ॥”

अमृतोपस्तरणमसीत्यपः स्पृष्ट्वोपस्थाय पात्रं नियच्छेत् । व्यस्तं महाव्याहृतिभिरद्भिः प्रदक्षिणं परिषिच्य सव्येन पाणिना पात्रमविमुञ्चन्नमृतोपस्तरणमसीति पुरस्तादपः पीत्वा पञ्चभिस्तैः प्राणाहुतीर्ज्जुहोति। प्राणे निविष्टोऽमृतं जुहोमि शिवोमाविशाप्रदाहाय प्राणाय स्वाहा । अपाने निविष्टोऽमृतं जुहोमि शिवोमाविशाप्रदाहायापानाय स्वाहा । व्याने निविष्टोऽमृतं जुहोमि शिवोमाविशाप्रदाहाय समानाय स्वाहा । इति तूष्णीं भूयो व्रतयेत् । प्रजापतिं मनसा ध्यायेत् ॥ * ॥ प्राणाय स्वाहेति प्राणस्तृप्यति । प्राणे तृप्यति चक्षुस्तृप्यति । चक्षुषि तृप्यति आदित्यस्तृप्यति । आदित्ये तृप्यति द्यौस्तृप्यति । दिवि तृप्यन्त्यां यत्किञ्चिद्द्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं अनुतृप्यति । व्यानाय स्वाहेति व्यानस्तृप्यति । व्याने तृप्यति श्रोत्रं तृप्यति । श्रोत्रे तृप्यति चन्द्रमास्तृप्यति । चन्द्रमसि तृप्यति दिशस्तृप्यन्ति । दिक्षु तृप्यन्तीषु यत्किञ्चिद्दिशः खं चन्द्रमाश्चाधितिष्ठन्ति । तत्तृप्यति तस्यानुतृप्तिं अनुतृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्चसेनेति । अपानाय स्वाहेत्यपानस्तृप्यति । अपाने तृप्यति वाक् तृप्यति । वाचि तृप्यन्त्यां अग्निस्तृप्यति । अग्नौ तृप्यति पृथिवी तृप्यति । पृथिव्यां तृप्यन्त्यां यत्किञ्चित् पृथिवी चाग्निश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं अनुतृप्यति । तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्चसेनेति । समानाय स्वाहा इति समानस्तृप्यति । समाने तृप्यति मनस्तृप्यति । मनसि तृप्यति पर्य्यन्यस्तृप्यति । पर्य्यन्ये तृप्यति विद्युत्तृप्यति । विद्युति तृप्यन्त्यां यत्किञ्चिद्विद्युत्पर्य्यन्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं अनुतृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्चसेनेति । उदानाय स्वाहेति उदानस्तृप्यति । उदाने तृप्यति वायुस्तृप्यति । वायौ तृप्यति आकाशस्तृप्यति । आकाशे तृप्यति यत्किञ्चिद्वायुश्चाकाशश्चाधितिष्ठतस्तत्तृप्यति । तस्यानुतृप्तिमनुतृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्च्चसेनेति ॥ * ॥

“भुक्तेऽन्ने केचित् काङ्क्षन्ति भुक्तशेषं भुवि क्षिपेत् ।
केचित काङ्क्षन्त्यनाजीवाः केचित् कर्म्मवशानुगाः ॥
भुञ्जन्तु मम चोत्सृष्टं पात्रे वाथ भुवि स्थिते ।
अमृतापिधानमसीत्युपरिष्टात् पयः पिबेत् ॥
अद्भिः पूर्व्वोपरिष्टाच्च वक्त्रं प्राणस्य निर्णयेत् ।
भुक्त्वा पीत्वा च यः कश्चित् शून्यं पात्रं समुत्सृजेत् ॥
स पुनः क्षुत्पिपासार्त्तो भवेज्जन्मनि जन्मनि ।
अमृतापिधानमसीत्युपरिष्टादपः पिबेत् ॥”

अपः पीत्वाचान्तः प्राणस्थानान्यद्भिः स्पृशति । प्राणानां ग्रन्थिरसीति हृदयमालभ्य जपति प्राणानां ग्रन्थिरसि इति प्राणदेशम् । विष्णोर्जठरमसीति नाभिदेशम् । यो देवानामधिपतीति पुनरपि हृदयदेशमालभ्य जपति । सावित्रीञ्चानुभाष्य त्रिरापो रसानां रसभुक् तन्नात्मा कर्म्मभिः प्रीयतां विश्वभुगिति ध्यायेदव्यक्तं पुरुषम् ॥ * ॥

“आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः ।
अश्नन्त एव सिद्ध्यन्ति नैषां सिद्धिरनश्नताम् ॥
गृहस्थो ब्रह्मचारी च योऽनश्नंस्तु तपश्चरेत् ।
प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः ॥
अन्तराप्रातराशञ्च सायमाशन्तथैव च ।
सदोपवासी भवति यो न भुङ्क्ते कदाचन ॥
प्राणाग्निहोत्रमन्त्रांस्तु निरुद्धे भोजने जपेत् ।
त्रेताग्निहोत्रमन्त्रांस्तु द्रव्यालाभेन तर्पयेत् ॥
यथाहि नलमैषीकमग्निप्रोतं प्रदूयते ।
तद्वत् सर्व्वाणि पापानि निर्दहन्त्यात्मयाजिनः ॥
यथेह क्षुधिता बाला मातरं पर्य्युपासते ।
एवं सर्व्वाणि भूतानि अग्निहोत्रमुपासते ॥”
इति ॥ * ॥

“भोजनस्य निषेधन्तु प्रवक्ष्याम्यनुपूर्व्वशः ।
नोच्छ्रितो भक्षयेत् किञ्चिन्न गच्छन् वा कदाचन ॥
खट्वारूढो न भुञ्जीत न पाणिस्थं कदाचन ।
चन्द्रसूर्य्योपरागे च ग्रस्तास्ते चन्द्रसूर्य्ययोः ॥
गोब्राह्मणोपवासेन न वाजीर्णे तु भोजने ।
निशीथे नैकवासास्तु न लग्नोच्छिष्टभाजने ॥
न रात्रौ तिलसम्बद्धं दधि शक्तून् माक्षिकम् ।
कोविदारवटाश्वत्थफलानि न कदाचन ।
शणकञ्च कौसुम्भं करमथितञ्च यद्दधि ॥
वेद्या बर्हिः पुरोडाशं तुल्यं गोमांसभक्षणे ।
नोच्छिष्टेन घृतं ग्राह्यं शक्तून् वापद्गतोऽपि सन् ।
पलाण्डुं लशुनं वापि भुञ्जंस्तत्पापमाप्नुयात् ॥
नानार्द्रमुखपाणिस्तु चन्द्रतारार्कमीक्षयेत् ।
भुञ्जन् कुर्व्वन् स्वमूत्राणि स्पृशेद् ब्रह्म न कीर्त्तयेत् ॥
नार्द्रवासाः शिरःस्नातः सोपानत्को निरासनः ।
शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकम् ॥
नाश्नीयान्न पिबेच्चैव कृत्वा पर्य्यस्तिकां नरः ।
पादप्रसारणं कृत्वा न च वेष्टितमस्तकः ॥
न च श्राद्धस्य यच्छिष्टं यच्च पर्य्युषितञ्च यत् ।
दम्पत्योर्भुक्तशेषन्तु न भुञ्जीत कदाचन ॥
नातिचरितमश्नीयात् भुक्त्वा शेषं विवर्ज्जयेत् ।
न भक्षयेत्तु निःशेषमन्यत्र दधिसर्पिषोः ॥
पयसो मधुशक्तूनां तिलानामोदनस्य च ।
न चैको मिष्टमश्नीयान्न बहूनाञ्च पश्यताम् ॥
बहवस्तु न भुञ्जन्ति तथा चैकस्य पश्यतः ।
ओष्ठौ च न लिहेत् पाणिं नाङ्गुलिं पात्रमेव च ॥
शून्यालयेऽग्निशालायां देवागारे तथैव च ।
आयुर्निरस्यते तस्य मिष्टैकस्य बुभुक्षतः ॥
अदत्त्वा गोऽग्निविप्रेभ्यः कुमारायानुयायिषु ।
एकोऽन्नं मिष्टमश्नाति ततोऽन्यो नास्यपुण्यकृत् ॥
यस्त्वेकपङ्क्त्यां विषमं ददाति
स्नेहाद्भयाद्वा यदि वार्थहेतोः ।
वेदेषु दृष्टामृषिभिस्तु गीतां
तां ब्रह्महत्यां मुनयो वदन्ति ॥